## द्वितीयः पाठः

# सहसा विदधीत न क्रियाम्

**संस्कृतसाहित्ये अनेके कथाग्रन्थाः बालबोधनार्थं विरचिताः सन्ति। तत्र पञ्चतन्त्रहितोपदेशादीनि पुस्तकानि प्रसिद्धानि। हितोपदेशे पशुपक्षिव्यवहारमवलम्ब्य सरलसरससुमधुररीत्या नीतिकथाः प्रस्तुताः।**

**प्रस्तुतेयं कथा पण्डितनारायणविरचितात् हितोपदेशात् सङ्कलिता। कथायामस्यां सम्यक् विचार्य एव कार्यं करणीयम्, कार्ये त्वरा न विधेयेति उपदेशः प्राप्यते।**

अस्ति उज्जयिन्यां माधवो नाम विप्रः। तस्य ब्राह्मणी प्रसूतबालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता। अथ ब्राह्मणाय राज्ञः धनं दातुमाह्वानमागतम्। तच्छ्रुत्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत् – 'यदि सत्वरं न गच्छामि तदाऽन्यः कश्चिदपि धनं ग्रहीष्यति'

यतः–

**आदानस्य प्रदानस्य कर्त्तव्यस्य च कर्मणः।**
**क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्॥**

किन्तु बालकस्यात्र रक्षको नास्ति, तत्किं करोमि? यातु, चिरकालपालितमिमं नकुलं पुत्रनिर्विशेषं बालकरक्षायां व्यवस्थाप्य गच्छामि। तथा कृत्वा गतः। ततस्तेन नकुलेन बालकसमीपमागच्छन् कृष्णसर्पो दृष्ट्वा व्यापाद्य कोपात्खण्डं खण्डं कृत्वा खादितः। ततोऽसौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य तच्चरणयोर्लुलोठ।

ततः स विप्रस्तथाविधं तं दृष्ट्वा 'बालकोऽनेन खादितः' इत्यवधार्य नकुलं व्यापादितवान्। अनन्तरं यावदुपसृत्यापत्यं पश्यति ब्राह्मणस्तावद् बालकः सुप्तः सर्पश्च व्यापादितस्तिष्ठति। ततस्तमुपकारकं नकुलं निरीक्ष्य भावितचेताः स परं विषादमगमत्।

अतोऽहं ब्रवीमि–

**योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः।**
**स तथा तप्यते मूढो ब्राह्मणो नकुलाद्यथा।**

तथा च –

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥**

### शब्दार्थः

| | | |
|---|---|---|
| प्रसूतबालापत्यस्य | – | सद्योजातपुत्रस्य ( नवजात सन्तान का) |
| ब्राह्मणमवस्थाप्य | – | ब्राह्मणसमीपे निधाय (ब्राह्मण के पास रखकर) |
| स्नातुम् | – | स्नानं कर्तुम् (स्नान करने के लिए) |
| अथ | – | अनन्तरम् (पश्चात्) |
| आह्वानमागतम् | – | आमन्त्रणमागतम् (बुलावा के लिए आया) |
| क्षिप्रम् | – | त्वरितम् (शीघ्र) |

| | | |
|---|---|---|
| पालितम् | – | पोषितम् (पाले हुए को) |
| व्यापाद्य | – | हत्वा (मारकर) |
| रक्तविलिप्तमुखपादः | – | शोणितलिप्तवदनचरणः (खून से मुख और पैर सने हुए) |
| लुलोठ | – | लुण्ठनं कृतम् (लोटा) |
| इत्यवधार्य | – | इत्थं विचार्य (यह विचार कर) |
| व्यापादितवान् | – | हतवान् (मार डाला) |
| अपत्यम् | – | सन्ततिं (सन्तान) |
| वृणुते | – | वरणं करोति (वरण करती है) |
| विमृश्यकारिणम् | – | विमर्शकारिणम् (विमर्श करने वाले को) |
| लुब्धाः | – | लोभयुक्ताः (लोभी) |

## अभ्यासः

**1. एकपदेन उत्तरत -**

(क) हितोपदेशस्य रचयिता कः?

(ख) सहसा किं न विदधीत?

(ग) अक्रियमाणस्य कर्त्तव्यस्य रसं कः पिबति?

(घ) सम्पदः कं वृणुते?

(ङ) नकुलं कः व्यापादितवान्?

**2. एकवाक्येन उत्तरत-**

(क) माधवः कुत्र वसति स्म?

(ख) ब्राह्मणी बालापत्यस्य रक्षार्थं कम् अवस्थाप्य स्नातुं गता?

(ग) राज्ञः कस्मै धनं दातुम् आह्वानमागतम्?

(घ) माधवः कं बालकरक्षायां व्यवस्थाप्य गतवान्?

**3. त्रिचतुर्भिर्वाक्यैः उत्तरत**

(क) राज्ञः आह्वानं श्रुत्वा ब्राह्मणः किम् अचिन्तयत्?

(ख) ब्राह्मणः बालकस्य रक्षायै किम् उपायमकरोत।

(ग) नकुलः कथं बालकस्य रक्षां कृतवान्?

(घ) सहसा विदधीत न क्रियाम् कथायाः सारः कः?

**4. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत-**

(क) बालापत्यम्

(ख) ब्राह्मणमवस्थाप्य

(ग) तदाऽन्यः

(घ) कश्चिदपि

(ङ) तच्छ्रुत्वा

**5. अधोलिखितपदेषु प्रकृति-प्रत्ययं पृथक् कुरुत-**

(क) कृत्वा

(ख) स्नातुम्

(ग) अवस्थाप्य

(घ) दृष्ट्वा

(ङ्) खादितः

(च) गता

**6. निर्देशानुसारं अधोलिखितानां धातुरूपं लिखत-**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| (क) | गम् | - | परस्मैपद | - | लङ्लकारः | - | मध्यमपुरुषः |
| (ख) | भू | - | परस्मैपद | - | लट्लकारः | - | प्रथमपुरुष : |
| (ग) | लभ् | - | परस्मैपद | - | लृट्लकारः | - | उत्तमपुरुषः |
| (घ) | पठ् | - | आत्मनेपद | - | विधिलिङ्लकारः | - | उत्तमपुरुषः |
| (ङ) | कृ | - | परस्मैपद | - | लोट्लकार | - | प्रथमपुरुषः |

**7. रिक्तस्थानानि पूरयत-**

(क) राज्ञः ब्राह्मणाय .............दातुम् आह्वानमागतम्।

(ख) आदानस्य प्रदानस्य............च कर्मणः।

(ग) कालः............रसं पिबति।

(घ) सहसा..........न विदधीत।

(ङ) नकुलं..............व्यापादितवान्

(च) सम्पदः................वृणुते।

**8. अधोलिखितश्लोकयोः भावार्थं लिखत-**

(क) **सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥**


(ख) **आदानस्य प्रदानस्य कर्त्तव्यस्य च कर्मणः।**
**क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्॥**

**9. विलोमपदमेलनं कुरुत -**

| **( अ )** | **( ब )** |
|---|---|
| बालकः | सम्पन्नता |
| आदानस्य | विद्वान् |

| | |
|---|---|
| द्रारिद्र्यम् | उपसृत्य |
| अपसृत्य | प्रदानस्य |
| मूढः | बालिका |

**10. विशेषणानि विशेष्यैः सह योजयत्**




**11. अधोलिखितान् शब्दानाधृत्य पञ्चवाक्यानि रचयत–**

तर्हि, तावत्, ततः, किल, तथा

**12. नामोल्लेखपूर्वकं सन्धिं कुरुत –**

1. ने + अनम्
2. भो + अति
3. अनु + अयः
4. देव + ऐश्वर्यम्
5. होतृ + ऋकारः

**योग्यताविस्तारः –**

- शिक्षाप्रदाः अन्याः कथाः सङ्ग्रहणीयाः।
- सन्धेः भेदोपभेदान् पठत।
- ‘सहसाविदधीत न क्रियाम्’ इति पाठमाधृत्य पारस्परिकचर्चां कुरुत।